"उदरे पच्यमानानामाध्मानादुत्कसारवत्।
कफशोणितमांसानां सारो जिह्वा प्रजायते॥"
इति सुश्रुते शारीरस्थाने ४र्थे अध्याये॥)

जिह्वानिर्लेखनं, क्ली, (जिह्वाया निर्लेखनं संस्कारः।) जिह्वामार्ज्जनम्। जिवछाँचड़ान इति भाषा। जिह्वामार्ज्जनद्रव्यम्। जिव्छाँचड़ा चियाड़ि इति भाषा। तत् दशाङ्गुलं कोमलं श्लक्ष्णं स्वर्णरूप्यताम्रलोहनिर्म्मितं जिह्वामलापकर्षणे प्रशस्तम्। तस्य गुणाः। वक्त्रवैरस्यजिह्वाश्रितमलनाशित्वम्। आरोग्यरुचिकारित्वञ्च। इति राजवल्लभः॥

("जिह्वानिर्लेखनं रौप्यं सौवर्णं वार्क्षमेव च।
तन्मलापहरं शस्तं मृदुश्लक्ष्णं दशाङ्गुलम्।
मुखवैरस्यदौर्गन्ध्य-शोफजाड्यहरं सुखम्॥"
अस्याधिक्येन रोगजनकता यथा,—
"जिह्वातिलेखनाच्छुष्कभक्षणादभिघाततः।
कुपितो हनुमूलस्थः संसयित्वानिलो हनू॥
करोति विवृतास्यत्वमथवा संवृतास्यताम्।
हनुसंसः स तेन स्यात् कृच्छ्राच्चर्व्वणभाषणम्॥"
इति वाभटे निदानस्थाने पञ्चदशेऽध्याये॥)

जिह्वापः, पुं, (जिह्वया पिबतीति। पा+"आतोऽनुपसर्गे कः।" ३।२।३। इति कः।) कुक्कुरः। व्याघ्रः। विड़ालः। भल्लूकः। इति शब्दरत्नावली॥ चित्रकव्याघ्रः। इति विश्वः॥

जिह्वामलं, क्ली, (जिह्वाया मलम्।) जिह्वास्थितमलम्। तत्पर्य्यायः। कुलुकम् २। इति त्रिकाण्डशेषः॥

जिह्वामूलीयः, पुं, (जिह्वामूले भवः। "जिह्वामूलाङ्गुलेश्छः।" ४।३।६२। इति छः।) वर्णात्मकवर्णः। वोपदेवेनास्य मू इति संज्ञा कृता। स तु कखपरे विसर्गस्थाने भवति। यथा हरि×काम्यः। अस्योच्चारणं विसर्गवत्। इति व्याकरणम्॥
"अधोविरेकयुक्ताग्रामात्रवद्वयरूपकः।
जिह्वामूलीय इत्येव गजकुम्भोपमोऽपरः॥"
इति सुपद्मव्याकरणटीका॥

जिह्वारदः, पुं, (जिह्वा एव रदो दन्त इव यस्य।) पक्षी। इति हारावली। ५६॥

जिह्वारोगः, पुं, (जिह्वाया रोगः।) मुखरोगान्तर्गतरसनाजातव्याधिः। तत्र जिह्वारोगाणां निदाननामसङ्ख्याः प्राह।
"वातजः पित्तजश्चापि कफजोऽलाससंज्ञकः।
उपजिह्विका च गदा जिह्वायां पञ्च कीर्त्तिताः॥"
तत्र वातजस्य लक्षणमाह।
जिह्वानिलेनस्फुटिता प्रसुप्ता
भवेच्च शाकच्छदनप्रकाशा।
स्फुटितामनाग्विदीर्णा। प्रसुप्ता रसानभिज्ञतया सुप्तेव। शाकच्छदनप्रकाशा शाको मरुभूमिजो द्रुमः तद्वत् कण्टकचिता॥ * ॥ पित्तजमाह।
पित्तात् सदाहैरुपचीयते च
दीर्घैः सरक्तैरपिकण्टकैश्च।
अयं रोगो लोके जलीति ख्यातः। जाड़ीति वङ्गभाषा॥ * ॥ कफजमाह।
कफेन गुर्व्वी बहलाचिता च
मांसोच्छ्रयैः शाल्मलिकण्टकाभैः।
बहला स्थूला। मांसोच्छ्रयैः मांसजकण्टकैः॥ * ॥ अलासमाह।
जिह्वातले यः श्वयथुः प्रगाढ़ः
सोऽलाससंज्ञः कफरक्तमूर्त्तिः।
जिह्वां सरुक् स्तम्भयति प्रवृद्धो
मूले च जिह्वा भृशमेति पाकम्॥
प्रगाढ़ः प्रकर्षेण गाढ़ो दारुणः। कफरक्तमूर्त्तिः कफरक्ताभ्यां मूर्त्तिर्यस्य स कफरक्तज इत्यर्थः। जिह्वास्तम्भेन वायुरप्यत्र बोद्धव्यः। भृशं पाकेन पित्तञ्च। अतस्त्रिदोषजोऽयम्। असाध्यत्वञ्चास्य॥ * ॥ उपजिह्विकामाह।
जिह्वाग्ररूपः श्वयथुश्च जिह्वा-
मुन्नाम्य जातः कफरक्तयोनिः।
प्रसेककण्डूपरिदाहयुक्तः
प्रकथ्यतेऽसावुपजिह्विकेति॥
जिह्वाग्ररूपः जिह्वाग्राकृतिः॥" * ॥
अथ जिह्वारोगाणां चिकित्सा।
"जिह्वागतविकाराणां शस्तं शोणितमोक्षणम्।
गुड़ूचीपिप्पलीनिम्बकवलः कटुभिः सुखः॥
ओष्ठप्रकोपेऽनिलजे यदुक्तं प्राक्चिकित्सितम्।
कण्टकेष्वनिलोत्थेषु तत् कार्य्यं भिषजा खलु॥
पित्तजे परिघृष्टे तु निःसृते दुष्टशोणिते।
प्रतिसारणगण्डूषनस्यञ्च मधुरं हितम्॥
कण्टकेषु कफोत्थेषु लिखितेष्वसृजः क्षये।
पिप्पल्यादिर्म्मधुयुतः कार्य्यस्तु प्रतिसारणे॥
उपजिह्वान्तु संलिख्य क्षारेण प्रतिसारयेत्।
शिरोविरेकगण्डूषधूमैश्चैनामुपाचरेत्॥
योषक्षाराभयावह्निचूर्णमेतत् प्रघर्षणम्।
उपजिह्वाप्रशान्त्यर्थमेभिस्तैलञ्च पाचयेत्॥"
इति भावप्रकाशः॥

जिह्वालिट् [ह्] पुं, (जिह्वया लेढ़ीति। लिह+क्विप्।) कुक्कुरः। इति भूरिप्रयोगः॥

जिह्वाशल्यः, पुं, (जिह्वाया शल्यमिव। अभिधानात् पुंस्त्वम्।) खदिरवृक्षः। इति राजनिर्घण्टः॥

जिह्वास्वादः, पुं, (जिह्वया स्वाद आस्वादनम्।) लेहनम्। इति हेमचन्द्रः। ३। ८८॥

जीनः, त्रि, (जिनाति जीर्य्यतीति। ज्या वयोहानौ+"गत्यर्थेति।" क्तः। ग्रहिज्येति सम्प्रसारणम्। हल इति दीर्घः। ल्वादिभ्येति नत्वम्।) वृद्धः। इत्यमरः। २। ६। ४२॥ (चर्म्मपुटे। यथा, मनुः। ११। १३८।
"जीनकार्म्मुकवस्तावीन् पृथग् दद्यात् विशुद्धये॥")

जीमूतः, पुं, (जयति आकाशमिति। जि+"जेर्मूट्चोदात्तः।" उणां ३।९१। इति क्तः। मूड़ागमो धातोर्दीर्घश्च।) पर्व्वतः। (यथा—मत्स्यपुराणे। १२०। ७५।
"जीमूतो द्रावणश्चैव मैनाकश्चन्द्रपर्व्वतः।
आयतास्ते महाशैलाः समुद्रं दक्षिणं प्रति॥" * ॥
जीवनं जलं मूत्रयति स्रावयतीति। पृषोदरादित्वात् साधुः। इति पुरुषोत्तमदेवः।) मेघः। (यथा, महाभारते। ६। १६। ३१।
"राजानमन्वयुः पश्चात् जीमूता इव वार्षिकाः॥")
मुस्ता। देवताड़वृक्षः। इत्यमरः। ३। ३। ५८॥ इन्द्रः। भृतिकरः। घोषकलता। इति हेमचन्द्रः॥ (यथा, चरके सूत्रस्थाने प्रथमेऽध्याये।
"धामार्गवमथेक्ष्वाकु जीमूतं कृतवेधनम्॥")
सूर्य्यः। यथा, महाभारते। ३। ३। सूर्य्यस्याष्टोत्तरशतनामकीर्त्तने। २२।
"वरुणः सागरोंऽशुश्च जीमूतो जीवनोऽरिहा॥"
ऋषिविशेषः। यथा, महाभारते ५।१११।२४।
"जीमूतस्यात्र विप्रर्षेरुपतस्थे महात्मनः॥"
मल्लविशेषः। भीमसेनस्तु विराटगृहवासकाले नियुद्धेनैनं निहतवान्। यथा, महाभारते। ४।१२।२२।
"ततस्तु वृत्रसङ्काशं भीमो मल्लं समाह्वयत्।
जीमूतं नाम तं तत्र मल्लं विख्यातविक्रमम्॥"
स्वनामख्यातो दशार्हस्य पौत्रः। यथा, हरिवंशे। ३२। २५।
"दशार्हस्य सुतो व्योमा व्योम्नो जीमूत
उच्यते॥"
वपुष्मत्पुत्रः। स तु शाल्मलद्वीपस्य ईश्वरविशेषः। यथा, ब्रह्माण्डे ३६ अध्याये।
"शाल्मलस्येश्वराः सप्त सुतास्ते तु वपुष्मतः।
श्वेतश्च हरितश्चैव जीमूतो रोहितस्तथा॥"
अस्य वर्षस्तु एतन्नाम्नैव विख्यातः। यथा, तत्रैव,—
"जीमूतस्य च जीमूतो रोहितस्य च रोहितः॥"
ऊनचत्वारिंशदक्षरवृत्तिविशेषः। तल्लक्षणादिकं छन्दःशब्दे द्रष्टव्यम्॥)

जीमूतकूटः, पुं, (जीमूतो मेघः कूटे शिखरे यस्य। अत्युन्नतत्वादेवास्य तथात्वम्।) पर्व्वतः। इति हारावली। ५१॥

जीमूतमूलं, क्ली, (जीमूतस्य मुस्ताया मूलमिव मूलमस्य।) शटी। इति रत्नमाला॥

जीमूतवाहनः, पु, (जीमूतो मेघो वाहनं यस्य।) इन्द्रः। मेघवाहन इत्यमरदर्शनात्। धर्म्मरत्ननामकस्मृतिसंग्रहकर्त्ता॥ (यदुक्तं दायभागे।
"बहुविधपूर्व्वनिबन्धृव्याख्यासञ्जातसंशयस्यैतत्
जीमूतवाहनकृतं प्रकरणमपनुत्तये धेयम्॥
परिभद्रकुलोद्भूतः श्रीमान् जीमूतवाहनः।
दायभागं चकारेमं विदुषां संशयच्छिदे॥"
शालिवाहननृपस्य पुत्रः। आश्विनकृष्णाष्टम्यां पुत्रसौभाग्यकामाभिर्नारीभिरयं पूज्यः। एतद्विवरणं जिताष्टमीशब्दे द्रष्टव्यम्॥ जीमूतकेतोर्नृपस्य पुत्रः। यथा, कथासरित्सागरे। २२। २४।
"अथ तस्याचिरादेव राज्ञः सूनुरजायत।
जीमूतवाहनं तं च नाम्ना स विदधे पिता॥")

जीमूतवाही, [न्] पुं, (जीमूतं वहति जीमूताकारेणात्मानं परिणामयतीत्यर्थः। वह+